तुलाचन्दनमिति, सामीप्यात् गङ्गायां गावश्चरन्तीति सन्निकृष्टोदेशोऽभिधीयते योगात् कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते, साधनात् अन्नं प्राणा इति। आधिपत्यात् अयं पुरुषः कुलं अयं गोत्रमिति तत्रायं सहचरणाद्योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यत इति यदि गौरित्यस्य पदस्य न व्यक्तिरर्थोऽस्तु तर्हि।" भा०

"आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः" सू०

"आकृतिः पदार्थः कस्मात् तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। सत्त्वावयवानां तदवयवानाञ्च नियतोव्यूह आकृतिः तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति नागृह्यमाणायाम्, यस्य ग्रहणात् सत्त्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽस्यार्थ इति नैतदुपपद्यते तस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। नचावयवव्यूहस्य जात्या योगः, कस्य तर्हि नियतावयवव्यूहस्य द्रव्यस्य, तस्माच्चाकृतिः पदार्थः। अस्तु तर्हि जातिः पदार्थः" भा०

"व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनां मृद्गवके जातिः" सू०

"जातिः पदार्थः, कस्मात् व्यक्त्याकृतियुक्तेऽपि मृद्गवके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि मृद्गवके प्रयुज्यन्ते कस्मात् जातेरभावात्। अस्ति हि तत्र व्यक्तिरस्त्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति।" भा०

"नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः" सू०

"जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नागृह्यमाणायामाकृतौ व्यक्तौ जातिमात्रं शुद्धं गृह्यते तस्मान्न जातिः पदार्थः इति। न वै पदार्थेन न भवितुं शक्यम् कः खल्विदानीं पदार्थ इति" भा०

"व्यक्त्याकृतिजातयस्तु पदार्थः" सू०

"तुशब्दो विशेषणार्थः। किं विशिष्यं प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानमङ्गन्तु जात्याकृती। यदा तु भेदोऽविवक्षितः सामान्यगतिस्तदा जातिः प्रधानमङ्गन्तु व्यक्त्याकृती स्वीकृते तदेतद्बहुलं प्रयोगेष्वाकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः। कथं पुनर्ज्ञायन्ते नानाव्यक्त्याकृतिजातय इति लक्षणभेदात् तत्र तावत्" भा०

"व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः" सू०

"व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शान्तानां गुरुत्वघनत्वद्रवत्वसंस्काराणामव्यापिनः परिमाणस्याश्रयो यथासम्भवं तद्द्रव्यम्, मूर्त्तिः मूर्च्छितावयवत्वादि" भा०

"आकृतिर्जातिलिङ्गाख्या" सू०

"यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च नाना सत्त्वानां तदवयवानाञ्च नियतव्यूहादिति नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गं शिरसा पादेन न गामनुमिन्वन्ति। नियते तु सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति। अनाकृतिव्यङ्ग्यकायां जातौ मृत्सुवर्णं रजतमित्येवमादिष्वाकृतिर्निवर्त्तते जहाति पदार्थत्वमिति" भ०

"समानप्रसवात्मिका जातिः" सू०

"या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया बहूनीतरेतरतो न व्यावर्त्तन्ते योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम्। यच्च केषाञ्चिद्भेदं कुतश्चिद्भेदं करोति तत् सामान्यविशेषो जातिरिति" भा०

शब्दशक्तिप्रकाशिकायामपि तदेतन्मतं समर्थितं यथा "जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता। जातिमात्रे हि सङ्केतात्तद्व्यक्तेर्भानं सुदुष्करम्" "यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्रा: सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वे सङ्केतितमित्याकारकग्रहाद्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेः एकशक्तत्वपदस्यान्यानुभावकत्वेऽतिप्रसङ्गात्" ततःपरं प्राक्दर्शितं भट्टमतं प्रदर्श्य दूषितं यथा "विनाप्याक्षेपं गामानयेत्यादितोगवादिकर्मताकत्वेनानयनादेरन्वयबोधस्यानुभविकत्वात् गौर्गच्छतीत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्यानुभवेनास्पर्शनात् गोत्वत्वाद्यनुपस्थित्या च गोत्वं गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्त्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्त्वाद्याक्षेपस्य व्यभिचारादिदोषेण दुःशकत्वाच्च। एतेन कर्मत्वादौ गोत्वादेः स्वाश्रयवृत्तित्वसम्बन्धेनान्वयबोधोत्तरं कर्मत्वस्य गोत्ववृत्तित्वं गोवृत्तित्वं विनानुपपन्नमित्यनुपपत्तिधीसहकृतेन गामित्यादिवाक्येनैव कर्मत्वं गवीयमित्यौपादानिकोगवादिव्यक्तेर्बोध इति श्रीकरमतमप्यनादेयं मिथोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यामवच्छिन्नबोधस्यालीकत्वेन शब्दानुपपत्तिभ्यां सम्भूय तथाविधौपादानिकबोधस्य जनना-